ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# तृतीयकाण्डे तृतीयः प्रश्नः

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **November 30, 2020**

## Version Notes:

**This is now the current Version 1.0 dated November 30, 2020.**

1. This replaces the earlier version 0.0 dated July 31, 2019.

2. This version has been updated with the errors found and reported till November 15, 2020.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st January 2019 |
| 2nd | Version Number | 0.0 dated 31st July 2019 |

**Table of Contents**


# 3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं पद पाठे तृतीयं काण्डं ........ 4

## 3.3 तृतीयकाण्डे तृतीयः प्रश्नः – वैकृतविधीनामभिधानं ........ 4

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

# 3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं

# पद पाठे तृतीयं काण्डं

## 3.3 तृतीयकाण्डे तृतीयः प्रश्नः – वैकृतविधीनामभिधानं

**TS 3.3.1.1**

अग्ने तेजस्विन् तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मा–मायुष्मन्तं

वर्चस्वन्तं मनुष्येषु कुरु दीक्षायै च त्वा तपसश्च तेजसे जुहोमि

तेजोविदसि तेजो मा मा हासीन्माऽहं तेजो हासिषं मा मां तेजो

हासीदिन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूया ओजस्वन्तं मामायुष्मन्तं

वर्चस्वन्तं मनुष्येषु कुरु ब्रह्मणश्च त्वा क्षत्रस्य चौ – [ ] 1

**TS 3.3.1.1- Padam**

अग्ने । तेजस्विन्न् । तेजस्वी । त्वम् । देवेषु । भूयाः । तेजस्वन्तम् ।

माम् । आयुष्मन्तम् । वर्चस्वन्तम् । मनुष्येषु । कुरु । दीक्षायै । च ।

त्वा । तपसः । च । तेजसे । जुहोमि । तेजोविदिति तेजः – वित् ।

असि । तेजः । मा । मा । हासीत् । मा । अहम् । तेजः ।

हासिषम् । मा । माम् । तेजः । हासीत् । इन्द्र । ओजस्विन्न् ।

ओजस्वी । त्वम् । देवेषु । भूयाः । ओजस्वन्तम् । माम् ।

आयुष्मन्तम् । वर्चस्वन्तम् । मनुष्येषु । कुरु । ब्रह्मणः । च ।

त्वा । क्षत्रस्य । च । **1 (50)**

**TS 3.3.1.2**

– जसे जुहोम्योजोविदस्योजो मा मा हासीन्माऽहमोजो हासिषं मा

मामोजो हासीथ् सूर्य भ्राजस्विन् भ्राजस्वी त्वं देवेषु भूया

भ्राजस्वन्तं मामायुष्मन्तं ँवर्चस्वन्तं मनुष्येषु कुरु वायोश्च त्वाऽपाञ्च

भ्राजसे जुहोमिसुवर्विदसि सुवर्मा मा हासीन्माऽह९ँ सुवर्. हासिषं

मा मा९ँ सुवर्.हासीन् मयि ( ) मेधां मयि प्रजां मय्यग्निस्तेजो

दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि

प्रजां मयि सूर्यो भ्राजो दधातु ॥ **2**

**TS 3.3.1.2 - Padam**

ओजसे । जुहोमि । ओजोविदित्योजः – वित् । असि । ओजः ।

मा । मा । हासीत् । मा । अहम् । ओजः । हासिषम् । मा । माम् ।

ओजः । हासीत् । सूर्य । भ्राजस्विन्न् । भ्राजस्वी । त्वम् । देवेषु ।

भूयाः । भ्राजस्वन्तम् । माम् । आयुष्मन्तम् । वर्चस्वन्तम् ।

मनुष्येषु । कुरु । वायोः । च । त्वा । अपाम् । च । भ्राजसे ।

जुहोमि । सुवर्विदिति सुवः – वित् । असि । सुवः । मा । मा ।

हासीत् । मा । अहम् । सुवः । हासिषम् । मा । माम् । सुवः ।

हासीत् । मयि ( ) । मेधाम् । मयि । प्रजामिति प्र – जाम् । मयि ।

अग्निः । तेजः । दधातु । मयि । मेधाम् । मयि । प्रजामिति

प्र – जाम् । मयि । इन्द्रः । इन्द्रियम् । दधातु । मयि । मेधाम् ।

मयि । प्रजामिति प्र – जाम् । मयि । सूर्यः । भ्राजः ।

दधातु ॥ **2 (73)**

*(क्षत्रस्य च – मयि – त्रयोविꣳशतिश्च) (A1)*

**TS 3.3.2.1**

वायुर्. हिं कर्ता ऽग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वे देवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनन्ते देवाः प्राणभृतः प्राणं मयि दधत्वेतद्वै सर्वमद्ध्वर्यु–रुपाकुर्वन्नुद्गातृभ्य उपाकरोति ते देवाः प्राणभृतः प्राणं मयि दधत्वित्याहैतदेव सर्वमात्मन् धत्त इडा देवहू र्मनु–र्यज्ञनी–र्बृहस्पतिरुक्थामदानि श॒ꣳसिषद् विश्वे देवाः – [ ] **3**

**TS 3.3.2.1 - Padam**

वायुः । हिंकर्तेति हिं – कर्ता । अग्निः । प्रस्तोतेति प्र – स्तोता । प्रजापतिरिति प्रजा – पतिः । साम । बृहस्पतिः । उद्गातेत्युत् – गाता । विश्वे । देवाः । उपगातार इत्युप – गातारः । मरुतः । प्रतिहर्तार इति प्रति – हर्तारः । इन्द्रः । निधनमिति नि – धनम् । ते । देवाः । प्राणभृत इति प्राण – भृतः । प्राणमिति प्र – अनम् । मयि । दधतु । एतत् । वै । सर्वम् । अद्ध्वर्युः । उपाकुर्वन्नित्युप – आकुर्वन्न् । उद्गातृभ्य इत्युद्गातृ – भ्यः । उपाकरोतीत्युप – आकरोति । ते । देवाः ।

प्राणभृत इति प्राण – भृतः । प्राणमिति प्र–अनम् । मयि । दधतु ।

इति । आह । एतत् । एव । सर्वम् । आत्मन्न् । धत्ते । इडा ।

देवहूरिति देव – हूः । मनुः । यज्ञनीरिति यज्ञ – नीः । बृहस्पतिः ।

उक्थामदानीत्युक्थ – मदानि । श॒ꣳसिषत् । विश्वे । देवाः । **3 (50)**

**TS 3.3.2.2**

सूक्तवाचः पृथिवि मातर्मा मा हिꣳसी र्मधु मनिष्ये मधु जनिष्ये

मधुवक्ष्यामि मधुवदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ

शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनु

मदन्तु ॥ **4**

**TS 3.3.2.2 - Padam**

सूक्तवाच इति सूक्त – वाचः । पृथिवि । मातः । मा । मा ।

हिꣳसीः । मधु । मनिष्ये । मधु । जनिष्ये । मधु । वक्ष्यामि ।

मधु । वदिष्यामि । मधुमतीमिति मधु – मतीम् । देवेभ्यः । वाचम् ।

उद्यासम् । शुश्रूषेण्याम् । मनुष्येभ्यः । तम् । मा । देवाः । अवन्तु ।

शोभायै । पितरः । अन्विति । मदन्तु ॥ **4 (28)**

*(शꣳसिषद् विश्वे देवा – अष्टाविꣳशतिश्च) (A2)*

**TS 3.3.3.1**

वसवस्त्वा प्र वृहन्तु गायत्रेण छन्दसाऽग्नेः प्रियं पाथ उपेहि
रुद्रास्त्वा प्र वृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथ उपेह्यादित्यास्त्वा
प्र वृहन्तु जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहि मान्दासु
ते शुक्र शुक्रमा धूनोमि भन्दनासु कोतनासु नूतनासु रेशीषु मेषीषु
वाशीषु विश्वभृथ्सु माद्ध्वीषु ककुहासु शक्वरीषु – [ ] **5**

**TS 3.3.3.1 - Padam**

वसवः । त्वा । प्रेति । वृहन्तु । गायत्रेण । छन्दसा । अग्नेः ।
प्रियम् । पाथः । उपेति । इहि । रुद्राः । त्वा । प्रेति । वृहन्तु ।
त्रैष्टुभेन । छन्दसा । इन्द्रस्य । प्रियम् । पाथः । उपेति । इहि ।
आदित्याः । त्वा । प्रेति । वृहन्तु । जागतेन । छन्दसा । विश्वेषाम् ।
देवानाम् । प्रियम् । पाथः । उपेति । इहि । मान्दासु । ते । शुक्र ।
शुक्रम् । एति । धूनोमि । भन्दनासु । कोतनासु । नूतनासु ।
रेशीषु । मेषीषु । वाशीषु । विश्वभृथ्स्विति विश्वभृत् – सु ।
माद्ध्वीषु । ककुहासु । शक्वरीषु । **5 (50)**

**TS 3.3.3.2**

शुक्रासु ते शुक्र शुक्रमा धूनोमि शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः ॥

आऽस्मिन्नुग्रा अचुच्यवुर्दिवो धारा असश्चत ॥

ककुहꣳ रूपं वृषभस्य रोचते बृहथ् सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः ॥

यत् ते सोमाऽदाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहोशिक् त्वं देव सोम गायत्रेण छन्दसा ऽग्नेः – [ ] **6**

**TS 3.3.3.2 - Padam**

शुक्रासु । ते । शुक्र । शुक्रम् । एति । धूनोमि । शुक्रम् । ते । शुक्रेण । गृह्णामि । अह्नः । रूपेण । सूर्यस्य । रश्मिभिरिति रश्मि–भिः ॥ एति । अस्मिन्न् । उग्राः । अचुच्यवुः । दिवः । धाराः । असश्चत ॥ ककुहम् । रूपम् । वृषभस्य । रोचते । बृहत् । सोमः । सोमस्य । पुरोगा इति पुरः – गाः । शुक्रः । शुक्रस्य । पुरोगा इति पुरः – गाः ॥ यत् । ते । सोम । अदाभ्यम् । नाम । जागृवि ।

तस्मै । ते । सोम । सोमाय । स्वाहा । उशिक् । त्वम् । देव ।
सोम । गायत्रेण । छन्दसा । अग्नेः । **6 (50)**

**TS 3.3.3.3**

प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं
पाथो अपीह्यस्मथ्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां
प्रियं पाथो अपीह्या नः प्राण एतु परावत आ ऽन्तरिक्षाद्दिवस्परि ।
आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा ॥
इन्द्राग्नी मे वर्चः कृणुतां वँर्चः सोमो बृहस्पतिः ( ) ।
वर्चो मे विश्वेदेवा वर्चो मे धत्तमश्विना ॥
दधन्वे वा यदीमनु वोचद् ब्रह्माणि वेरु तत् ।
परि विश्वानि काव्या नेमिश्चक्र–मिवाऽभवत् ॥ **7**

**TS 3.3.3.3 - Padam**

प्रियम् । पाथः । अपीति । इहि । वशी । त्वम् । देव । सोम ।
त्रैष्टुभेन । छन्दसा । इन्द्रस्य । प्रियम् । पाथः । अपीति । इहि ।
अस्मथ्सखेत्यस्मत् – सखा । त्वम् । देव । सोम । जागतेन ।

छन्दसा । विश्वेषाम् । देवानाम् । प्रियम् । पाथः । अपीति । इहि ।
एति । नः । प्राण इति प्र – अनः । एतु । परावत इति परा–वतः ।
एति । अन्तरिक्षात् । दिवः । परि ॥ आयुः । पृथिव्याः । अधीति ।
अमृतम् । असि । प्राणायेति प्र – अनाय । त्वा ॥ इन्द्राग्नी
इतीन्द्र–अग्नी । मे । वर्चः । कृणुताम् । वर्चः । सोमः ।
बृहस्पतिः ( ) ॥ वर्चः । मे । विश्वे । देवाः । वर्चः । मे । धत्तम् ।
अश्विना ॥ दधन्वे । वा । यत् । ईम् । अन्विति । वोचत् । ब्रह्माणि ।
वेः । उ । तत् ॥ परीति । विश्वानि । काव्या । नेमिः । चक्रम् । इव ।
अभवत् ॥ **7 (75)**

*(शक्वरीष्व – ग्ने – बृहस्पतिः – पञ्चविंशतिश्च) (A3)*

**TS 3.3.4.1**

एतद्वा अपां नामधेयं गुह्यं ँयदाधावा मान्दासु ते शुक्र शुक्रमा
धूनोमीत्याहापामेव नामधेयेन गुह्येन दिवो वृष्टिमव रुन्धे शुक्रं ते
शुक्रेण गृह्णामीत्याहैतद्वा अह्नो रूपं ँयद्–रात्रिः सूर्यस्य रश्मयो

वृष्ट्या ईशतेऽह्न एव रूपेण सूर्यस्य रश्मिभिर्दिवो वृष्टिं

च्यावयत्याऽस्मिन्नुग्रा – [ ] 8

**TS 3.3.4.1 - Padam**

एतत् । वै । अपाम् । नामधेयमिति नाम – धेयम् । गुह्यम् । यत् ।

आधावा इत्या – धावाः । मान्दासु । ते । शुक्र । शुक्रम् । एति ।

धूनोमि । इति । आह । अपाम् । एव । नामधेयेनेति नाम – धेयेन ।

गुह्येन । दिवः । वृष्टिम् । अवेति । रुन्धे । शुक्रम् । ते । शुक्रेण ।

गृह्णामि । इति । आह । एतत् । वै । अह्नः । रूपम् । यत् । रात्रिः ।

सूर्यस्य । रश्मयः । वृष्ट्याः । ईशते । अह्नः । एव । रूपेण ।

सूर्यस्य । रश्मिभिरिति रश्मि – भिः । दिवः । वृष्टिम् । च्यावयति ।

एति । अस्मिन्न् । उग्राः । **8 (50)**

**TS 3.3.4.2**

अचुच्यवुरित्याह यथायजुरेवैतत् ककुह९ं रूपं ँवृषभस्य रोचते

बृहदित्याहैतद्वा अस्य ककुह९ं रूपं ँयद्–वृष्टी रूपेणैव वृष्टिमव

रुन्धे यत्ते सोमाऽदाभ्यं नाम जागृवीत्याहैष ह वै हविषा हविर्यजति

यो ऽदाभ्यं गृहीत्वा सोमाय जुहोतिपरा वा एतस्याऽऽयुः प्राण एति – [ ] 9

**TS 3.3.4.2 - Padam**

अचुच्यवुः । इति । आह । यथायजुरिति यथा–यजुः । एव । एतत् । ककुहम् । रूपम् । वृषभस्य । रोचते । बृहत् । इति । आह । एतत् । वै । अस्य । ककुहम् । रूपम् । यत् । वृष्टिः । रूपेण । एव । वृष्टिम् । अवेति । रुन्धे । यत् । ते । सोम । अदाभ्यम् । नाम । जागृवि । इति । आह । एषः । ह । वै । हविषा । हविः । यजति । यः । अदाभ्यम् । गृहीत्वा । सोमाय । जुहोति । परेति । वै । एतस्य । आयुः । प्राण इति प्र – अनः । एति । **9 (50)**

**TS 3.3.4.3**

यो ऽ॒ꣳशुं गृह्णात्या नः प्राण एतु परावत इत्याहाऽऽयुरेव प्राणमात्मन् धत्ते ऽमृतमसि प्राणाय त्वेति हिरण्यमभि व्यनित्यमृतं ँवै हिरण्यमायुः प्राणोऽमृतेनैवाऽऽ*युरात्मन् धत्ते शतमानं भवति शतायुः पुरुषः

शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यप उप स्पृशति भेषजं ँवा आपो ( ) भेषजमेव कुरुते ॥ **10**

**TS 3.3.4.3 - Padam**

यः । अꣳशुम् । गृह्णाति । एति । नः । प्राण इति प्र – अनः । एतु । परावत इति परा – वतः । इति । आह । आयुः । एव । प्राणमिति प्र – अनम् । आत्मन्न् । धत्ते । अमृतम् । असि । प्राणायेति प्र – अनाय । त्वा । इति । हिरण्यम् । अभि । वीति । अनिति । अमृतम् । वै । हिरण्यम् । आयुः । प्राण इति प्र – अनः । अमृतेन । एव । आयुः । आत्मन्न् । धत्ते । शतमानमिति शत – मानम् । भवति । शतायुरिति शत – आयुः । पुरुषः । शतेन्द्रिय इति शत – इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठति । अपः । उपेति । स्पृशति । भेषजम् । वै । आपः ( ) । भेषजम् । एव । कुरुते ॥ **10 (53)** *(उग्रा – एत्या – प – स्त्रीणि च) (A4)*

**TS 3.3.5.1**

वायुरसि प्राणो नाम सवितुराधिपत्ये ऽपानं मे दाश्चक्षुरसि श्रोत्रं नाम धातुराधिपत्य आयुर्मे दा रूपमसि वर्णो नाम बृहस्पतेराधिपत्ये प्रजां मे दा ऋतमसि सत्यं नामेन्द्रस्याऽऽ*धिपत्ये क्षत्रं मे दा भूतमसि भव्यं नाम पितृणामाधिपत्ये ऽपामोषधीनां गर्भं धा ऋतस्य त्वा व्योमन ऋतस्य – [ ] **11**

**TS 3.3.5.1 - Padam**

वायुः । असि । प्राण इति प्र – अनः । नाम । सवितुः ।
आधिपत्य इत्याधि – पत्ये । अपानमित्यप – अनम् । मे । दाः ।
चक्षुः । असि । श्रोत्रम् । नाम । धातुः । आधिपत्य इत्याधि–पत्ये ।
आयुः । मे । दाः । रूपम् । असि । वर्णः । नाम । बृहस्पतेः ।
आधिपत्य इत्याधि – पत्ये । प्रजामिति प्र–जाम् । मे । दाः ।
ऋतम् । असि । सत्यम् । नाम । इन्द्रस्य ।
आधिपत्य इत्याधि – पत्ये । क्षत्रम् । मे । दाः । भूतम् । असि ।
भव्यम् । नाम । पितृणाम् । आधिपत्य इत्याधि – पत्ये । अपाम् ।

ओषधीनाम् । गर्भम् । धाः । ऋतस्य । त्वा ।

व्योमन इति वि – ओमने । ऋतस्य । **11 (50)**

**TS 3.3.5.2**

त्वा विभूमन ऋतस्य त्वा विधर्मण ऋतस्य त्वा सत्यायर्तस्य त्वा ज्योतिषे प्रजापति र्विराजमपश्यत् तया भूतं च भव्यं चाऽसृजत तामृषिभ्यस्तिरो ऽदधात् तां जमदग्निस्तपसा ऽपश्यत् तया वै स पृश्ञीन् कामानसृजत तत् पृश्ञीनां पृश्ञित्वं ँयत् पृश्ञयो गृह्यन्ते पृश्ञीनेव तैः कामान्. यजमानोऽव रुन्धे वायुरसि प्राणो – [ ] **12**

**TS 3.3.5.2 - Padam**

त्वा । विभूमन इति वि – भूमने । ऋतस्य । त्वा । विधर्मण इति वि – धर्मणे । ऋतस्य । त्वा । सत्याय । ऋतस्य । त्वा । ज्योतिषे । प्रजापतिरिति प्रजा – पतिः । विराजमिति वि – राजम् । अपश्यत् । तया । भूतम् । च । भव्यम् । च । असृजत । ताम् । ऋषिभ्य इत्यृषि – भ्यः । तिरः । अदधात् । ताम् । जमदग्निः । तपसा । अपश्यत् । तया । वै । सः । पृश्ञीन् । कामान् । असृजत । तत् ।

पृश्ञीनाम् । पृश्ञित्वमिति पृश्ञि – त्वम् । यत् । पृश्ञयः ।
गृह्यन्ते । पृश्ञीन् । एव । तैः । कामान् । यजमानः । अवेति । रुन्धे ।
वायुः । असि । प्राण इति प्र – अनः । **12 (50)**

**TS 3.3.5.3**

नामेत्याह प्राणापानावेवाव रुन्धे चक्षुरसि श्रोत्रं नामेत्याहाऽऽयुरेवाव
रुन्धे रूपमसि वर्णो नामेत्याह प्रजामेवाव रुन्धऋतमसि सत्यं
नामेत्याह क्षत्रमेवाव रुन्धे भूतमसि भव्यं नामेत्याह पशवो वा
अपामोषधीनां गर्भः पशूनेवा – [ ] **13**

**TS 3.3.5.3 - Padam**

नाम । इति । आह । प्राणापानाविति प्राण–अपानौ । एव । अवेति ।
रुन्धे । चक्षुः । असि । श्रोत्रम् । नाम । इति । आह । आयुः । एव ।
अवेति । रुन्धे । रूपम् । असि । वर्णः । नाम । इति । आह ।
प्रजामिति प्र – जाम् । एव । अवेति । रुन्धे । ऋतम् । असि ।
सत्यम् । नाम । इति । आह । क्षत्रम् । एव । अवेति । रुन्धे ।

भूतम् । असि । भव्यम् । नाम । इति । आह । पशवः । वै ।
अपाम् । ओषधीनाम् । गर्भः । पशून् । एव । **13 (50)**

**TS 3.3.5.4**

–व रुन्ध एतावद्वै पुरुषं परितस्तदेवाव रुन्ध ऋतस्य त्वा व्योमन्
इत्याहेयं ँवा ऋतस्य व्योमेमामेवाभि जयत्यृतस्य त्वा विभूमन्
इत्याहाऽन्तरिक्षं ँवा ऋतस्य विभूमान्तरिक्षमेवाभि जयत्यृतस्य त्वा
विधर्मण इत्याह द्यौर्वा ऋतस्य विधर्म दिवमेवाभि
जयत्यृतस्य– [ ] **14**

**TS 3.3.5.4 - Padam**

अवेति । रुन्धे । एतावत् । वै । पुरुषम् । परितः । तत् । एव ।
अवेति । रुन्धे । ऋतस्य । त्वा । व्योमन् इति वि – ओमने । इति ।
आह । इयम् । वै । ऋतस्य । व्योमेति वि – ओम । इमाम् । एव ।
अभीति । जयति । ऋतस्य । त्वा । विभूमन् इति वि–भूमने । इति ।
आह । अन्तरिक्षम् । वै । ऋतस्य । विभूमेति वि – भूम ।
अन्तरिक्षम् । एव । अभीति । जयति । ऋतस्य । त्वा ।

विधर्मण इति वि – धर्मणे । इति । आह । द्यौः । वै । ऋतस्य ।
विधर्मेति वि –धर्म । दिवम् । एव । अभीति । जयति ।
ऋतस्य । **14 (50)**

**TS 3.3.5.5**

त्वा सत्यायेत्याह दिशो वा ऋतस्य सत्यं दिश एवाभि जयत्यृतस्य
त्वा ज्योतिष इत्याह सुवर्गो वै लोक ऋतस्य ज्योतिः सुवर्गमेव
लोकमभि जयत्येतावन्तो वै देवलोकास्तानेवाभि जयति दश सं
पद्यन्ते दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठति ॥ **15**

**TS 3.3.5.5 - Padam**

त्वा । सत्याय । इति । आह । दिशः । वै । ऋतस्य । सत्यम् ।
दिशः । एव । अभीति । जयति । ऋतस्य । त्वा । ज्योतिषे । इति ।
आह । सुवर्ग इति सुवः – गः । वै । लोकः । ऋतस्य । ज्योतिः ।
सुवर्गमिति सुवः – गम् । एव । लोकम् । अभीति । जयति ।
एतावन्तः । वै । देवलोका इति देव – लोकाः । तान् । एव ।

अभीति । जयति । दश । समिति । पद्यन्ते । दशाक्षरेति

दश – अक्षरा । विराडिति वि – राट् । अन्नम् । विराडिति

वि – राट् । विराजीति वि – राजि । एव । अन्नाद्य इत्यन्न – अद्ये ।

प्रतीति । तिष्ठति ॥ **15 (46)**

*(व्योमन ऋतस्य – प्राणः – पशुनेव – विधर्म दिवमेवाभि*

*जयत्यृतस्य –षट्चत्वारिꣳशच्च) (A5)*

**TS 3.3.6.1**

देवा वै यद्–यज्ञेन नावारुन्धत तत् परैरवारुन्धत तत् पराणां

परत्वं ँयत् परे गृह्यन्ते यदेव यज्ञेननावरुन्धे तस्यावरुद्ध्यै

यं प्रथमं गृह्णातीममेव तेन लोकमभि जयतियं द्वितीयमन्तरिक्षं

तेन यं तृतीयममुमेव तेन लोकमभि जयति यदेते गृह्यन्त एषां

ँल्लोकानामभिजित्या – [ ] **16**

**TS 3.3.6.1 - Padam**

देवाः । वै । यत् । यज्ञेन । न । अवारुन्धतेत्यव – अरुन्धत । तत् ।

परैः । अवेति । अरुन्धत । तत् । पराणाम् । परत्वमिति पर – त्वम् ।

यत् । परे । गृह्यन्ते । यत् । एव । यज्ञेन । न । अवरुन्ध

इत्यव–रुन्धे । तस्य । अवरुद्ध्या इत्यव –रुद्ध्यै । यम् । प्रथमम् ।

गृह्णाति । इमम् । एव । तेन । लोकम् । अभीति । जयति । यम् ।

द्वितीयम् । अन्तरिक्षम् । तेन । यम् । तृतीयम् । अमुम् । एव । तेन ।

लोकम् । अभीति । जयति । यत् । एते । गृह्यन्ते । एषाम् ।

लोकानाम् । अभिजित्या इत्यभि – जित्यै । **16 (50)**

**TS 3.3.6.2**

उत्तरेष्वहस्स्वमुतो ऽर्वाञ्चो गृह्यन्ते ऽभिजित्यैवेमां ँल्लोकान् पुनरिमं

ँल्लोकं प्रत्यवरोहन्ति यत् पूर्वेष्वहस्स्वितः पराञ्चो गृह्यन्ते तस्मादितः

पराञ्च इमे लोका यदुत्तरेष्वहस्स्वमुतो ऽर्वाञ्चो गृह्यन्ते तस्मादमुतो

ऽर्वाञ्च इमे लोकास्तस्मादयातयाम्नो लोकान् मनुष्या

उप जीवन्ति ब्रह्मवादिनो वदन्ति कस्माथ् सत्याददभ्य ओषधयः

सं भवन्त्योषधयो – [ ] **17**

## TS 3.3.6.2 - Padam

उत्तरेष्वित्युत् – तरेषु । अहस्स्वित्यहः–सु । अमुतः । अर्वाञ्चः ।

गृह्यन्ते । अभिजित्येत्यभि–जित्य । एव । इमान् । लोकान् । पुनः ।

इमम् । लोकम् । प्रत्यवरोहन्तीति प्रति – अवरोहन्ति । यत् । पूर्वेषु ।

अहस्स्वित्यहः – सु । इतः । पराञ्चः । गृह्यन्ते । तस्मात् । इतः ।

पराञ्चः । इमे । लोकाः । यत् । उत्तरेष्वित्युत् – तरेषु ।

अहस्स्वित्यहः – सु । अमुतः । अर्वाञ्चः । गृह्यन्ते । तस्मात् ।

अमुतः । अर्वाञ्चः । इमे । लोकाः । तस्मात् । अयातयाम्न

इत्ययात–याम्नः । लोकान् । मनुष्याः । उपेति । जीवन्ति ।

ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । कस्मात् । सत्यात् ।

अद्भ्य इत्यत् – भ्यः । ओषधयः । समिति । भवन्ति ।

ओषधयः । **17 (50)**

## TS 3.3.6.3

मनुष्याणामन्नं प्रजापतिं प्रजा अनु प्र जायन्त इति परानन्विति

ब्रूयाद्–यद्–गृह्णात्यद्भ्यस्त्वौषधीभ्यो गृह्णामीति तस्माद्द्भ्य

ओषधयः सं भवन्ति यद्–गृह्णात्योषधीभ्यस्त्वा प्रजाभ्यो गृह्णामीति
तस्मादोषधयो मनुष्याणामन्नं ँयद्–गृह्णाति प्रजाभ्यस्त्वा
प्रजापतये गृह्णामीति तस्मात् प्रजापतिं प्रजा अनु प्र जायन्ते ॥ 18

**TS 3.3.6.3 - Padam**

मनुष्याणाम् । अन्नम् । प्रजापतिमिति प्रजा – पतिम् । प्रजा इति
प्र – जाः । अनु । प्रेति । जायन्ते । इति । परान् । अन्विति । इति ।
ब्रूयात् । यत् । गृह्णाति । अद्भ्य इत्यत् – भ्यः । त्वा । ओषधीभ्य
इत्योषधि – भ्यः । गृह्णामि । इति । तस्मात् । अद्भ्य इत्यत्–भ्यः ।
ओषधयः । समिति । भवन्ति । यत् । गृह्णाति । ओषधीभ्य
इत्योषधि – भ्यः । त्वा । प्रजाभ्य इति प्र – जाभ्यः । गृह्णामि ।
इति । तस्मात् । ओषधयः । मनुष्याणाम् । अन्नम् । यत् । गृह्णाति ।
प्रजाभ्य इति प्र – जाभ्यः । त्वा । प्रजापतय इति प्रजा – पतये ।
गृह्णामि । इति । तस्मात् । प्रजापतिमिति प्रजा – पतिम् । प्रजा इति
प्र – जाः । अनु । प्रेति । जायन्ते ॥ 18 (48) *(अभिजित्यै – भवन्त्योषधयो – ऽष्टाचत्वारिꣳशच्च) (A6)*

**TS 3.3.7.1**

प्रजापतिर्देवासुरान सृजत तदनु यज्ञोऽसृज्यत यज्ञं छन्दाᳲसि

ते विष्वञ्चो व्यक्रामन्थ् सोऽसुराननु यज्ञोऽपाक्रामद्–यज्ञं छन्दाᳲसि

ते देवा अमन्यन्ताऽमी वा इदमभूवन्. यद्–वयᳶ स्म इति ते

प्रजापतिमुपाऽधावन्थ् सोऽब्रवीत्–प्रजापतिश्छन्दसां ँवीर्यमादाय

तद्वः प्र दास्यामीति स छन्दसां ँवीर्य – [ ] **19**

**TS 3.3.7.1 - Padam**

प्रजापतिरिति प्रजा – पतिः । देवासुरानिति देव – असुरान् ।

असृजत । तत् । अन्विति । यज्ञः । असृज्यत । यज्ञम् । छन्दाᳲसि ।

ते । विष्वञ्चः । वीति । अक्रामन्न् । सः । असुरान् । अन्विति ।

यज्ञः । अपेति । अक्रामत् । यज्ञम् । छन्दाᳲसि । ते । देवाः ।

अमन्यन्त । अमी इति । वै । इदम् । अभूवन्न् । यत् । वयम् ।

स्मः । इति । ते । प्रजापतिमिति प्रजा–पतिम् । उपेति । अधावन्न् ।

सः । अब्रवीत् । प्रजापतिरिति प्रजा – पतिः । छन्दसाम् । वीर्यम् ।

आदायेत्या – दाय । तत् । वः । प्रेति । दास्यामि । इति । सः ।

छन्दसाम् । वीर्यम् । **19 (50)**

**TS 3.3.7.2**

मादाय तदेभ्यः प्रायच्छत् तदनु छन्दाꣳस्यपाऽक्रामन् छन्दाꣳसि

यज्ञस्ततो देवा अभवन् पराऽसुरा य एवं छन्दसां ँवीर्यं ँवेदाऽऽ

श्रावयाऽस्तु श्रौषड् यज ये यजामहे वषट्कारो भवत्यात्मना पराऽस्य

भ्रातृव्यो भवति ब्रह्मवादिनो वदन्ति कस्मै क–मद्ध्वर्युरा श्रावयतीति

छन्दसां ँवीर्यायेति ब्रूयादेतद् वै – [ ] **20**

**TS 3.3.7.2 - Padam**

आदायेत्या–दाय । तत् । एभ्यः । प्रेति । अयच्छत् । तत् । अन्विति ।

छन्दाꣳसि । अपेति । अक्रामन्न् । छन्दाꣳसि । यज्ञः । ततः । देवाः ।

अभवन्न् । परेति । असुराः । यः । एवम् । छन्दसाम् । वीर्यम् ।

वेद । एति । श्रावय । अस्तु । श्रौषट् । यज । ये । यजामहे ।

वषट्कार इति वषट् – कारः । भवति । आत्मना । परेति । अस्य ।

भ्रातृव्यः । भवति । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति ।

कस्मै । कम् । अद्ध्वर्युः । एति । श्रावयति । इति । छन्दसाम् ।
वीर्याय । इति । ब्रूयात् । एतत् । वै । **20 (50)**

**TS 3.3.7.3**

छन्दसांँ वीर्यमा श्रावयाऽस्तु श्रौषड् यज ये यजामहे वषट्कारो
य एवंँ वेद सवीर्यैरेव छन्दोभिरर्चति यत् किं चार्चति यदिन्द्रो
वृत्र-महन्नमेद्ध्यं तद्-यद्-यतीनपावपदमेद्ध्यं तदथ कस्मादैन्द्रो
यज्ञ आ स॒स्थातोरित्याहुरिन्द्रस्य वा एषा यज्ञिया तनूर्यद्-
यज्ञस्तामेव तद् ( ) यजन्ति य एवंँ वेदोपैनंँ यज्ञो नमति ॥ **21**

**TS 3.3.7.3 - Padam**

छन्दसाम् । वीर्यम् । एति । श्रावय । अस्तु । श्रौषट् । यज । ये ।
यजामहे । वषट्कार इति वषट् - कारः । यः । एवम् । वेद ।
सवीर्यैरिति स - वीर्यैः । एव । छन्दोभिरिति छन्दः - भिः ।
अर्चति । यत् । किम् । च । अर्चति । यत् । इन्द्रः । वृत्रम् । अहन्न् ।
अमेद्ध्यम् । तत् । यत् । यतीन् । अपावपदित्यप - अवपत् ।
अमेद्ध्यम् । तत् । अथ । कस्मात् । ऐन्द्रः । यज्ञः । एति ।

सꣳस्थातोरिति सं – स्थातोः । इति । आहुः । इन्द्रस्य । वै । एषा । यज्ञिया । तनूः । यत् । यज्ञः । ताम् । एव । तत् ( ) । यजन्ति । यः । एवम् । वेद । उपेति । एनम् । यज्ञः । नमति ॥ **21 (58)**

*(छन्दसां ँवीर्यं – ँवा – एव त – दष्टौ च) (A7)*

**TS 3.3.8.1**

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधुचारु गव्यं पितेवपुत्रमभि रक्षतादिमं ॥
आ वृश्च्यते वा एतद्–यजमानोऽग्निभ्यां ँयदेनयोः
शृतंकृत्याथाऽन्यत्रावभृथमवैत्यायुर्दा अग्ने हविषो जुषाण
इत्यवभृथमवैष्यन् जुहुयादाहुत्यैवैनौ शमयति नाऽऽर्तिमार्च्छति
यजमानो यत् कुसीद – [ ] **22**

**TS 3.3.8.1 - Padam**

आयुर्दा इत्यायुः – दाः । अग्ने । हविषः । जुषाणः । घृतप्रतीक इति घृत – प्रतीकः । घृतयोनिरिति घृत–योनिः । एधि ॥ घृतम् । पीत्वा । मधु । चारु । गव्यम् । पिता । इव । पुत्रम् । अभीति । रक्षतात् ।

इमम् ॥ एति । वृश्च्यते । वै । एतत् । यजमानः ।
अग्निभ्यामित्यग्नि – भ्याम् । यत् । एनयोः । शृतंकृत्येति
शृतं – कृत्य । अथ । अन्यत्र । अवभृथमित्यव – भृथम् ।
अवैतीत्यव – एति । आयुर्दा इत्यायुः – दाः । अग्ने । हविषः ।
जुषाणः । इति । अवभृथमित्यव – भृथम् । अवैष्यन्नित्यव–एष्यन्न् ।
जुहुयात् । आहुत्येत्या – हुत्या । एव । एनौ । शमयति । न ।
आर्तिम् । एति । ऋच्छति । यजमानः । यत् । कुसीदम् । **22 (50)**

**TS 3.3.8.2**

मप्रतीत्तं मयि येन यमस्य बलिना चरामि ।
इहैव सन् निरवदये तदेतत् तदग्ने अनृणो भवामि ।
विश्वलोप विश्वदावस्य त्वा ऽऽसञ्जुहोम्यग्धादेको ऽहुतादेकः
समसनादेकः ।
तेनः कृण्वन्तु भेषज७ं सदः सहो वरेण्यं ॥
अयं नो नभसा पुरः स७स्फानो अभि रक्षतु ।

गृहाणामसमर्त्यै बहवो नो गृहा असन्न् ॥

स त्वन्नो – [ ] 23

**TS 3.3.8.2 - Padam**

अप्रतीत्तमित्यप्रति–इत्तम् । मयि । येन । यमस्य । बलिना । चरामि ॥

इह । एव । सन्न् । निरवदय इति निः–अवदये । तत् । एतत् । तत् ।

अग्ने । अनृणः । भवामि ॥ विश्वलोपेति विश्व – लोप ।

विश्वदावस्येति विश्व – दावस्य । त्वा । आसन्न् । जुहोमि ।

अग्धादित्यग्ध – अत् । एकः । अहुतादित्यहुत – अत् । एकः ।

समसनादिति समसन – अत् । एकः ॥ ते । नः । कृण्वन्तु ।

भेषजम् । सदः । सहः । वरेण्यम् ॥ अयम् । नः । नभसा । पुरः ।

स॒ꣳस्फान इति सं – स्फानः । अभीति । रक्षतु ॥ गृहाणाम् ।

असमर्त्या इत्यसं – ऋत्यै । बहवः । नः । गृहाः । असन्न् ॥ सः ।

त्वम् । नः । 23 (50)

**TS 3.3.8.3**

नभसस्पत ऊर्जं नो धेहि भद्रया ।

पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ॥

देव सँस्फान सहस्रपोषस्येशिषे स नो रास्वाऽज्यानिं रायस्पोषं

सुवीर्यं संँवथ्सरीणाँ स्वस्तिं ॥

अग्निर्वाव यम इयं यमी कुसीदं वा एतद्-यमस्य यजमान आ दत्ते

यदोषधीभिर्वेदिँ स्तृणाति यदनुपौष्य प्रयायाद् ग्रीवबद्धमेन -[ ] **24**

**TS 3.3.8.3 - Padam**

नभसः । पते । ऊर्जम् । नः । धेहि । भद्रया ॥ पुनः । नः । नष्टम् ।

एति । कृधि । पुनः । नः । रयिम् । एति । कृधि ॥ देव ।

सँस्फानेति सं - स्फान । सहस्रपोषस्येति सहस्र - पोषस्य ।

ईशिषे । सः । नः । रास्व । अज्यानिम् । रायः । पोषम् ।

सुवीर्यमिति सु - वीर्यम् । संँवथ्सरीणामिति सं - वथ्सरीणाम् ।

स्वस्तिम् ॥ अग्निः । वाव । यमः । इयम् । यमी । कुसीदम् । वै ।

एतत् । यमस्य । यजमानः । एति । दत्ते । यत् ।

ओषधीभिरित्योषधि – भिः । वेदिम् । स्तृणाति । यत् ।
अनुपौष्येत्यनुप – ओष्य । प्रयायादिति प्र – यायात् ।
ग्रीवबद्धमिति ग्रीव – बद्धम् । एनम् । **24 (50)**

**TS 3.3.8.4**

ममुष्मिन् ँल्लोके नेनीयेरन्. यत् कुसीदमप्रतीत्तं मयीत्युपौषतीहैव
सन् यमं कुसीदं निरवदायानृणः सुवर्गं ँल्लोकमेतियदि मिश्रमिव
चरेदञ्जलिना सक्तून् प्रदाव्ये जुहुयादेष वा अग्निर्वैश्वानरो यत्
प्रदाव्यः स एवैनᳪस्वदयत्यह्नां ँविधान्या–मेकाष्टकायामपूपं
चतुश्शरावं पक्त्वा प्रातरेतेन कक्षमुपौषेद्यदि – [ ] **25**

**TS 3.3.8.4 - Padam**

अमुष्मिन्न् । लोके । नेनीयेरन्न् । यत् । कुसीदम् ।
अप्रतीत्तमित्यप्रति – इत्तम् । मयि । इति । उपेति । ओषति । इह ।
एव । सन्न् । यमम् । कुसीदम् । निरवदायेति निः – अवदाय ।
अनृणः । सुवर्गमिति सुवः–गम् । लोकम् । एति । यदि । मिश्रम् ।
इव । चरेत् । अञ्जलिना । सक्तून् । प्रदाव्य इति प्र – दाव्ये ।

जुहुयात् । एषः । वै । अग्निः । वैश्वानरः । यत् । प्रदाव्य इति प्र - दाव्यः । सः । एव । एनम् । स्वदयति । अह्नाम् । विधान्यामिति वि - धान्याम् । ऐकाष्टकायामित्येक - अष्टकायाम् । अपूपम् । चतुश्शरावमिति चतुः - शरावम् । पक्त्वा । प्रातः । एतेन । कक्षम् । उपेति । ओषेत् । यदि । **25 (50)**

**TS 3.3.8.5**

दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुप यन्ति यो वा उपद्रष्टार-मुप-श्रोतारमनुख्यातारं ँविद्वान्. यजते सममुष्मिन् ँलोक इष्टापूर्तेन गच्छतेऽग्निर्वा उपद्रष्टा वायुरुपश्रोता ऽऽदित्योऽनुख्याता तान्. य एवं ँविद्वान्. यजते सममुष्मिन् ँलोक इष्टापूर्तेन गच्छते ऽयं नो नभसा पुर - [ ] **26**

**TS 3.3.8.5 - Padam**

दहति । पुण्यसममिति पुण्य - समम् । भवति । यदि । न । दहति । पापसममिति पाप - समम् । एतेन । ह । स्म । वै । ऋषयः । पुरा ।

विज्ञानेनेति वि – ज्ञानेन । दीर्घसत्रमिति दीर्घ – सत्रम् । उपेति ।
यन्ति । यः । वै । उपद्रष्टारमित्युप – द्रष्टारम् ।
उपश्रोतारमित्युप – श्रोतारम् । अनुख्यातारमित्यनु – ख्यातारम् ।
विद्वान् । यजते । समिति । अमुष्मिन्न् । लोके ।
इष्टापूर्तेनेतीष्ट – पूर्तेन । गच्छते । अग्निः । वै । उपद्रष्टेत्युप–द्रष्टा ।
वायुः । उपश्रोतेत्युप – श्रोता । आदित्यः । अनुख्यातेत्यनु–ख्याता ।
तान् । यः । एवम् । विद्वान् । यजते । समिति । अमुष्मिन्न् । लोके ।
इष्टापूर्तेनेतीष्ट – पूर्तेन । गच्छते । अयम् । नः । नभसा ।
पुरः । **26 (50)**

**TS 3.3.8.6**

इत्याहाग्निर्वै नभसा पुरोऽग्निमेव तदाहैतन्मे गोपायेति स त्वं नो
नभसस्पत इत्याह वायुर्वै नभसस्पतिर्वायुमेव तदाहैतन्मे गोपायेति
देव स॑स्फानेत्याहाऽसौ वा आदित्यो देवः स॑स्फान आदित्यमेव
तदाहैतन्मे गोपायेति ॥ **27**

**TS 3.3.8.6 - Padam**

इति । आह । अग्निः । वै । नभसा । पुरः । अग्निम् । एव । तत् ।
आह । एतत् । मे । गोपाय । इति । सः । त्वम् । नः । नभसः ।
पते । इति । आह । वायुः । वै । नभसः । पतिः । वायुम् । एव ।
तत् । आह । एतत् । मे । गोपाय । इति । देव । स॒स्फानेति
सं – स्फान । इति । आह । असौ । वै । आदित्यः । देवः ।
स॒स्फान इति सं – स्फानः । आदित्यम् । एव । तत् । आह ।
एतत् । मे । गोपाय । इति ( ) ॥ **27 (50)**

***(कुसीदं – त्वं न – एन – मोषेद्यादि – पुर – आदित्यमेव तदाहै तन्मे गोपायेति) (A8)***

**TS 3.3.9.1**

एतं युवानं परि वो ददामि तेन क्रीडन्तीश्चरत प्रियेण ।
मा नः शाप्त जनुषा सुभागा रायस्पोषेण समिषा मदेम ॥
नमो महिम्न उत चक्षुषे ते मरुतां पितस्तदहं गृणामि ।
अनु मन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यं ॥

देवानामेष उपनाह आसीदपां गर्भ ओषधीषु न्यक्तः ।
सोमस्य द्रप्समवृणीत पूषा – [ ] 28

TS 3.3.9.1 - Padam

एतम् । युवानम् । परीति । वः । ददामि । तेन । क्रीडन्तीः । चरत ।
प्रियेण ॥ मा । नः । शाप्त । जनुषा । सुभागा इति सु – भागाः ।
रायः । पोषेण । समिति । इषा । मदेम ॥ नमः । महिम्ने । उत ।
चक्षुषे । ते । मरुताम् । पितः । तत् । अहम् । गृणामि ॥ अन्विति ।
मन्यस्व । सुयजेति सु–यजा । यजाम । जुष्टम् । देवानाम् । इदम् ।
अस्तु । हव्यम् ॥ देवानाम् । एषः । उपनाह इत्युप – नाहः ।
आसीत् । अपाम् । गर्भः । ओषधीषु । न्यक्त इति नि – अक्तः ॥
सोमस्य । द्रप्सम् । अवृणीत । पूषा । 28 (50)

TS 3.3.9.2

बृहन्नद्रिरभवत् तदेषां ॥
पिता वथ्सानां पतिरघ्नियानामथो पिता महतां गर्गराणां ।
वथ्सो जरायु प्रतिधुक् पीयूष आमिक्षा मस्तु घृतमस्य रेतः ॥

त्वां गावोऽवृणत राज्याय त्वाꣳ हवन्त मरुतः स्वर्काः ।
वर्ष्मन् क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो वि भजा वसूनि ॥
व्यृद्धेन वा एष पशुना यजते यस्यैतानि न क्रियन्त एष ( )
ह त्वै समृद्धेन यजते यस्यैतानि क्रियन्ते ॥ 29

**TS 3.3.9.2 - Padam**

बृहन्न् । अद्रिः । अभवत् । तत् । एषाम् ॥ पिता । वथ्सानाम् ।
पतिः । अघ्नियानाम् । अथो इति । पिता । महताम् । गर्गराणाम् ॥
वथ्सः । जरायु । प्रतिधुगिति प्रति – धुक् । पीयूषः । आमिक्षा ।
मस्तु । घृतम् । अस्य । रेतः ॥ त्वाम् । गावः । अवृणत । राज्याय ।
त्वाम् । हवन्त । मरुतः । स्वर्का इति सु – अर्काः ॥ वर्ष्मन्न् ।
क्षत्रस्य । ककुभि । शिश्रियाणः । ततः । नः । उग्रः । वीति । भज ।
वसूनि ॥ व्यृद्धेनेति वि – ऋद्धेन । वै । एषः । पशुना । यजते ।
यस्य । एतानि । न । क्रियन्ते । एषः ( ) । ह । तु । वै । समृद्धेनेति
सं – ऋद्धेन । यजते । यस्य । एतानि । क्रियन्ते ॥ 29 (58)

*(पूषा – क्रियन्त एषो – ऽष्टौ च) (A9)*

**TS 3.3.10.1**

सूर्यो देवो दिविषद्भ्यो धाता क्षत्राय वायुः प्रजाभ्यः ।

बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मतीं जुहोतु ॥

यस्यास्ते हरितो गर्भोऽथो योनिर्. हिरण्ययी ।

अङ्गान्यह्रुता यस्यै तां देवैः समजीगमं ॥

आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद ।

भूम्याश्चतस्रः प्रदिशस्ताभिरा वर्तया पुनः ॥

वि ते भिनद्मि तकरीं ँवि योनिं ँवि गवीन्यौ ।

वि – [ ] **30**

**TS 3.3.10.1 - Padam**

सूर्यः । देवः । दिविषद्भ्य इति दिविषत् – भ्यः । धाता । क्षत्राय ।

वायुः । प्रजाभ्य इति प्र – जाभ्यः ॥ बृहस्पतिः । त्वा ।

प्रजापतय इति प्रजा–पतये । ज्योतिष्मतीम् । जुहोतु ॥ यस्याः ।

ते । हरितः । गर्भः । अथो इति । योनिः । हिरण्ययी ॥ अङ्गानि ।

अह्रुता । यस्यै । ताम् । देवैः । समिति । अजीगमम् ॥ एति ।

वर्तन । वर्तय । नीति । निवर्तनेति नि – वर्तन । वर्तय । इन्द्र ।
नर्दबुद ॥ भूम्याः । चतस्रः । प्रदिश इति प्र – दिशः । ताभिः ।
एति । वर्तय । पुनः ॥ वीति । ते । भिनद्मि । तकरीम् । वीति ।
योनिम् । वीति । गवीन्यौ ॥ वीति । **30 (50)**

**<u>TS 3.3.10.2</u>**

मातरञ्च पुत्रं च वि गर्भं च जरायु च ॥
बहिस्ते अस्तु बालिति ॥
उरुद्रप्सो विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भं ॥
एकपदी द्विपदी त्रिपदी चतुष्पदी पञ्चपदी षट्पदी
सप्तपद्यष्टापदी भुवना ऽनु प्रथता॰ स्वाहा ॥
मही द्यौः पृथिवी च न इमं ँयज्ञं मिमिक्षतां ।
पिपृतान्नो भरीमभिः ॥ **31**

**<u>TS 3.3.10.2 - Padam</u>**

मातरम् । च । पुत्रम् । च । वीति । गर्भम् । च । जरायु । च ॥
बहिः । ते । अस्तु । बाल् । इति ॥ उरुद्रप्स इत्युरु – द्रप्सः ।

विश्वरूप इति विश्व – रूपः । इन्दुः । पवमानः । धीरः । आनञ्ज । गर्भम् ॥ एकपदीत्येक – पदी । द्विपदीति द्वि– पदी । त्रिपदीति त्रि – पदी । चतुष्पदीति चतुः – पदी । पञ्चपदीति पञ्च–पदी । षट्पदीति षट् – पदी । सप्तपदीति सप्त – पदी । अष्टापदीत्यष्टा–पदी । भुवना । अन्विति । प्रथताम् । स्वाहा ॥ मही । द्यौः । पृथिवी । च । नः । इमम् । यज्ञम् । मिमिक्षताम् ॥ पिपृताम् । नः । भरीमभिरिति भरीम – भिः ॥ **31 (44)**

*(गविन्यौ वि – चतुश्चत्वारिꣳशच्च) (A10)*

**TS 3.3.11.1**

इदं वा–मास्ये हविः प्रियमिन्द्राबृहस्पती ।
उक्थं मदश्च शस्यते ॥
अयं वां परि षिच्यते सोमइन्द्राबृहस्पती ।
चारुर्मदाय पीतये ॥
अस्मे इन्द्राबृहस्पती रयिं धत्तꣳ शतग्विनं ।
अश्वावन्तꣳ सहस्रिणं ॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।

इन्द्रः पुरस्तादुत मद्ध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥

वि ते विष्वग्वातजूतासो अग्ने भामासः – [ ] **32**

**TS 3.3.11.1 - Padam**

इदम् । वाम् । आस्ये । हविः । प्रियम् । इन्द्राबृहस्पती

इतीन्द्रा–बृहस्पती ॥ उक्थम् । मदः । च । शस्यते ॥ अयम् ।

वाम् । परीति । सिच्यते । सोमः । इन्द्राबृहस्पती इतीन्द्रा–बृहस्पती ॥

चारुः । मदाय । पीतये ॥ अस्मे इति ।

इन्द्राबृहस्पती इतीन्द्रा – बृहस्पती । रयिम् । धत्तम् । शतग्विनमिति

शत – ग्विनम् ॥ अश्वावन्तमित्यश्व – वन्तम् । सहस्रिणम् ॥

बृहस्पतिः । नः । परीति । पातु । पश्चात् । उत ।

उत्तरस्मादित्युत् – तरस्मात् । अधरात् । अघायोरित्यघ – योः ॥

इन्द्रः । पुरस्तात् । उत । मद्ध्यतः । नः । सखा । सखिभ्य इति

सखि – भ्यः । वरिवः । कृणोतु ॥ वीति । ते । विष्वक् ।

वातजूतास इति वात – जूतासः । अग्ने । भामासः । **32 (50)**

**TS 3.3.11.2**

शुचे शुचयश्चरन्ति ।

तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥

त्वामग्ने मानुषीरीडते विशो होत्राविदं ँविविचिꣳ रत्नधातमं ।

गुहा सन्तꣳ सुभग विश्वदर्.शतं तु विष्मणसꣳ सुयजं घृतश्रियं ॥

धाता ददातु नो रयिमीशानो जगतस्पतिः ।

स नः पूर्णेन वावनत् ॥

धाता प्रजाया उत राय ईशे धातेदं ँविश्वं भुवनं जजान ।

धाता पुत्रं ँयजमानाय दाता – [ ] **33**

**TS 3.3.11.2 - Padam**

शुचे । शुचयः । चरन्ति ॥ तुविम्रक्षास इति तुवि – म्रक्षासः ।

दिव्याः । नवग्वाः । वना । वनन्ति । धृषता । रुजन्तः ॥ त्वाम् ।

अग्ने । मानुषीः । ईडते । विशः । होत्राविदमिति होत्रा – विदम् ।

विविचिमिति वि–विचिम् । रत्नधातममिति रत्न – धातमम् ॥ गुहा ।

सन्तम् । सुभगेति सु – भग । विश्वदर्.शतमिति विश्व–दर्.शतम् ।

तुविष्मणसम् । सुयजमिति सु – यजम् ।

घृतश्रियमिति घृत – श्रियम् ॥ धाता । ददातु । नः । रयिम् ।

ईशानः । जगतः । पतिः ॥ सः । नः । पूर्णेन । वावनत् ॥ धाता ।

प्रजाया इति प्र – जयाः । उत । रायः । ईशे । धाता । इदम् ।

विश्वम् । भुवनम् । जजान ॥ धाता । पुत्रम् । यजमानाय ।

दाता । **33 (50)**

**TS 3.3.11.3**

तस्मा उ हव्यं घृतवद्विधेम ॥

धाता ददातु नो रयिं प्राचीं जीवातुमक्षितां ।

वयं देवस्य धीमहि सुमतिꣳ सत्यराधसः ॥

धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे ।

तस्मै देवा अमृताः सं व्ँयन्तां विश्वे देवासो अदितिः सजोषाः ॥

अनु नोऽद्याऽनुमतिर्यज्ञं देवेषु मन्यतां ।

अग्निश्च हव्यवाहनो भवतां दाशुषे मयः ॥

अन्विदनुमते त्वं – [ ] **34**

## TS 3.3.11.3 - Padam

तस्मै । उ । हव्यम् । घृतवदिति घृत–वत् । विधेम ॥ धाता । ददातु ।
नः । रयिम् । प्राचीम् । जीवातुम् । अक्षिताम् ॥ वयम् । देवस्य ।
धीमहि । सुमतिमिति सु – मतिम् । सत्यराधस इति
सत्य – राधसः ॥ धाता । ददातु । दाशुषे । वसूनि । प्रजाकामायेति
प्रजा – कामाय । मीढुषे । दुरोण इति दुः–ओने ॥ तस्मै । देवाः ।
अमृताः । समिति । व्ययन्ताम् । विश्वे । देवासः । अदितिः ।
सजोषा इति स – जोषाः ॥ अन्विति । नः । अद्य ।
अनुमतिरित्यनु – मतिः । यज्ञम् । देवेषु । मन्यताम् ॥ अग्निः । च ।
हव्यवाहन इति हव्य – वाहनः । भवताम् । दाशुषे । मयः ॥
अन्विति । इत् । अनुमत इत्यनु – मते । त्वम् । **34 (50)**

## TS 3.3.11.4

मन्यासै शञ्चनः कृधि ।
क्रत्वे दक्षाय नो हिनु प्र ण आयू॑ꣳषि तारिषः ॥
अनु मन्यता–मनुमन्यमाना प्रजावन्त॑ꣳ रयिमक्षीयमाणं ।

तस्यै वयꣳ हेडसि मा ऽपि भूम सा नो देवी सुहवा शर्म यच्छतु ॥

यस्यामिदं प्रदिशि यद्विरोचतेऽनुमतिं प्रति भूषन्त्यायवः ।

यस्या उपस्थ उर्वन्तरिक्षꣳ सा नो देवी सुहवा शर्म यच्छतु ॥ 35

**TS 3.3.11.4 - Padam**

मन्यासै । शम् । च । नः । कृधि ॥ क्रत्वे । दक्षाय । नः । हिनु ।

प्रेति । नः । आयूꣳषि । तारिषः ॥ अन्विति । मन्यताम् ।

अनुमन्यमानेत्यनु – मन्यमाना । प्रजावन्तमिति प्रजा – वन्तम् ।

रयिम् । अक्षीयमाणम् ॥ तस्यै । वयम् । हेडसि । मा । अपीति ।

भूम । सा । नः । देवी । सुहवेति सु – हवा । शर्म । यच्छतु ॥

यस्याम् । इदम् । प्रदिशीति प्र – दिशि । यत् ।

विरोचत इति वि – रोचते । अनुमतिमित्यनु – मतिम् । प्रतीति ।

भूषन्ति । आयवः ॥ यस्याः । उपस्थ इत्युप – स्थः । उरु ।

अन्तरिक्षम् । सा । नः । देवी । सुहवेति सु – हवा । शर्म ।

यच्छतु ॥ 35 (50)

**TS 3.3.11.5**

राकामह॑ꣳ सुहवा॑ꣳ सुष्टुती हु॑वे शृणोतु नः सुभगा बो॑धतु त्मना॑ ।
सीव्य॑त्वपः सूच्या॑ऽच्छिद्यमानया ददा॑तु वीरꣳ शतदायमु॑क्थ्यं॑ ॥
या॑स्ते राके सु॑मतयः सु॑पेशसो याभि॑र्ददासि दाशुषे व॑सूनि ।
ता॑भिर्नो अद्य सु॑मना उ॑पागहि सहस्रपो॑षꣳ सुभगे रराणा ॥
सि॑नीवालि या सु॑पाणिः ॥
कुहूमहꣳ सुभगा॑ं विद्मनापसमस्मिन्. यज्ञे सुहवा॑ं जोहवीमि ।
सा नो॑ ददातु श्र॑वणं ( ) पितृणा॑ं तस्यास्ते देवि हविषा॑ विधेम ॥
कुहू–र्दे॑वाना॑ममृतस्य॑ पत्नी हव्या नो अस्य हविषश्चिकेतु ।
सं दा॑शुषे कि॑रतु भूरि वा॑मꣳ रायस्पोषं चिकितुषे दधातु ॥ 36

**TS 3.3.11.5 - Padam**

राकाम् । अहम् । सुहवा॑मिति सु – हवा॑म् । सुष्टु॑तीति सु–स्तुती ।
हुवे । शृ॑णोतु । नः । सुभ॑गेति सु – भगा॑ । बो॑धतु । त्मना॑ ॥
सी॑व्यतु । अ॑पः । सूच्या । अ॑च्छिद्यमानया । द॑दातु । वीरम् ।
श॑तदा॑यमिति शत – दायम् । उक्थ्य॑म् ॥ याः । ते । राके ।

सुमतय इति सु - मतयः । सुपेशास इति सु - पेशसः । याभिः ।
ददासि । दाशुषे । वसूनि ॥ ताभिः । नः । अद्य ।
सुमना इति सु - मनाः । उपागहीत्युप - आगहि । सहस्रपोषमिति
सहस्र - पोषम् । सुभग इति सु - भगे । रराणा ॥ सिनीवालि ।
या । सुपाणिरिति सु - पाणिः ॥ कुहूम् । अहम् । सुभगामिति
सु - भगाम् । विघ्नापसमिति विघ्न - अपसम् । अस्मिन्न् ।
यज्ञे । सुहवामिति सु - हवाम् । जोहवीमि ॥ सा । नः । ददातु ।
श्रवणम् ( ) । पितृणाम् । तस्याः । ते । देवि । हविषा । विधेम ॥
कुहूः । देवानाम् । अमृतस्य । पत्नी । हव्या । नः । अस्य । हविषः ।
चिकेतु ॥ समिति । दाशुषे । किरतु । भूरि । वामम् । रायः । पोषम् ।
चिकितुषे । दधातु ॥ **36 (74)**

*(भामासो - दाता - त्व - मन्तरिक्षं सा नो देवी सुहवा शर्म यच्छतु -श्रवणं - चतुर्विंशतिश्च) (A11)*

==============

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(अग्ने तेजस्विन् – वायु – र्वसव – स्त्वैतद्वा अपां – ँवायुरसि प्राणो नाम – देवा वै यद्यज्ञेनन – प्रजापति र्देवासुरा – नायुर्दा – एतं ँयुवान७ – सूर्यो देव – इदं ँवा – मेकादश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(अग्ने तेजस्विन् – वायुरसि – छन्दसां ँवीर्यं – मातरञ्च – षट्त्रि७शत् )

**First and Last Padam of Third Prasnam of Kandam 3 :-**

(अग्ने तेजस्वि७ – श्चिकितुषे दधातु )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

तृतीयकाण्डे तृतीयः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 3 , Prasanam 3 – (TS 3.3)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 2 | 123 |
| Anuvakam 2 | 2 | 78 |
| Anuvakam 3 | 3 | 175 |
| Anuvakam 4 | 3 | 153 |
| Anuvakam 5 | 5 | 246 |
| Anuvakam 6 | 3 | 148 |
| Anuvakam 7 | 3 | 158 |
| Anuvakam 8 | 6 | 300 |
| Anuvakam 9 | 2 | 108 |
| Anuvakam 10 | 2 | 94 |
| Anuvakam 11 | 5 | 274 |
| Total → | 36 | 1857 |

**Notes:**

- **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**